# पुरुष सुक्तम्

सहस्रशीर्षा पुरुषः । सहस्राक्षः सहस्रपात् ।स भूमिं विश्वतो वृत्वा । अत्यतिष्ठद्दशाङ्गुलम् ॥पुरुष एवेदग्ं सर्वम् । यद्भूतं यच्च भव्यम् ।उतामृतत्व स्येशानः । यदन्नेनातिरोहति ॥एतावानस्य महिमा । अतो ज्यायाग्ंश्च पूरुषः ।

पादोऽस्य विश्वा भूतानि । त्रिपादस्यामृतं दिवि ॥त्रिपादूर्ध्व उदैत्पुरुषः । पादो ऽस्येहाऽऽभवात्पुनः ।ततो विष्वण्-व्यक्रामत् । साशनानशने अभि ॥तस्मोद्विराडजायत । विराजो अधि पूरुषः ।स जातो अत्यरिच्यत । पश्चाद्-भूमिमथो पुरः ॥

यत्पुरुषेण हविषा । देवा यज्ञमतन्वत ।वसन्तो अस्यासीदाज्यम् । ग्रीष्म इध्मश्शरध्धविः ॥सप्तास्यासन्-परिधयः । त्रिः सप्त समिधः कृताः ।देवा यद्यज्ञं तन्वानाः । अबध्नन्-पुरुषं पशुम् ॥तं यज्ञं बरुहिषि प्रौक्षन् । पुरुषं जातमग्रतः ।

तेन देवा अयजन्त । साध्या ऋषयश्च ये ॥तस्मोद्यज्ञात्-सर्वहुतः । सम्भृतं पृषदाज्यम् ।पशूग्-स्ताग्श्च।क्रे वायव्यान् । आरण्यान्-ग्राम्याश्च ये ॥तस्मोद्यज्ञात्सर्वहुतः । ऋचः सामानि जज्ञिरे ।छन्दाग्ंसि जज्ञिरे तस्मोत् । यजुस्तस्मादजायत ॥

तस्मादश्वा अजायन्त । ये के चोभयादतः ।गावो ह जज्ञिरे तस्मोत् । तस्मोज्जाता अजावयः ॥यत्पुरुषं व्यदधुः । कतिथा व्यकल्पयन् ।मुखं किमस्य कौ बाहू । कावूरू पादावुच्येते ॥ब्राहमणोऽस्य मुखमासीत् । बाहू राजन्यः कृतः ।

ऊरू तदस्य यद्वैश्यः । पद्भ्यागं शूद्रो अजायतः ॥चन्द्रमा मनसो जातः । चक्षोः सूर्यो अजायत ।मुखादिन्द्रश्चाग्निश्च । प्राणाद्वायुरजायत ॥नाभ्या आसीदुन्तरिक्षम् । शीर्ष्णो द्यौः समवर्तत ।पद्भ्यां भूमिर्दिशः श्रोत्रात् । तथा लोकाग्म् अकल्पयन् ॥

वेदाहमेतं पुरुषं महान्तम् । आदित्यवर्णं तमसस्तु पारे ।सर्वाणि रूपाणि विचित्य धीरः । नामानि कृत्वाऽभिवदन्, यदाऽऽस्ते ॥धाता पुरस्ताद्यमुदाजहार । शक्रः प्रविद्वान्-प्रदिशश्चतस्रः ।तमेवं विद्वानमृत इह भवति । नान्यः पन्था अयनाय विद्यते ॥यज्ञेन यज्ञमयजन्त देवाः । तानि धर्माणि प्रथमान्यासन् । ते ह नाकं महिमानः सचन्ते । यत्र पूर्वे साध्यास्सन्ति देवाः ॥

अद्भ्यः सम्भूतः पृथिव्यै रसोच्च । विश्वकर्मणः समवर्तताधि ।तस्य त्वष्टा विदधद्रूपमेति । तत्पुरुषस्य विश्वमाजानमग्रे ॥वेदाहमेतं पुरुषं महान्तम् । आदित्यवर्णं तमसः परस्तात् ।तमेवं विद्वानमृत इह भवति । नान्यः पन्था विद्यतेऽयनाय ॥प्रजापतिश्चरति गर्भे अन्तः । अजायमानो बहुधा विजायते ।

तस्य धीराः परिजानन्ति योनिम् । मरीचीनां पदमिच्छन्ति वेधसः ॥यो देवेभ्य आतपति । यो देवानां पुरोहितः ।पूर्वो यो देवेभ्यो जातः । नमो रुचाय ब्राहमये ॥रुचं ब्राहमं जनयन्तः । देवा अग्रे तदब्रुवन् ।यस्त्वैवं ब्राहमणो विद्यात् । तस्य देवा असन् वशे ॥

ह्रीश्च॑ ते ल॒क्ष्मीश्च॒ पत्न्यौ᳚ । अ॒हो॒रा॒त्रे पा॒र्श्वे ।नक्ष॑त्राणि रू॒पम् । अ॒श्विनौ॒ व्यात्त᳚म् ।इ॒ष्टं म॑निषाण । अ॒मुं म॑निषाण । सर्वं᳚ मनिषाण ॥

ॐ शान्तिः॒ शान्तिः॒ शान्तिः॑ ॥